# AryAshatakam by Shri Appayya Dikshit

# આર્યાશતકમ્ શ્રીમદપ્પય્યદીક્ષિતવિરચિતમ્

## Document Information

Text title : AryAshatakam by Shri Appayya Dikshit

File name : AryAshatakamappayyA.itx

Category : shataka, shiva, appayya-dIkShita

Location : doc_shiva

Author : Appayya Dixit

Transliterated by : shaivam.org, Sunder Hattangadi

Proofread by : Sunder Hattangadi Rajani

Latest update : August 4, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# આર્યાશતકમ્ શ્રીમદપ્પય્યદીક્ષિતવિરચિતમ્

દયયા યદીયયા વાઙ્નવરસરુચિરા સુધાધિકોદેતિ ।
શરણાગતચિન્તિતદં તં શિવચિન્તામણિં વન્દે ॥ ૧॥

શિરસિ સિતાંશુકલાઢ્યં કરુણાપીયૂષપૂરિતં નયને ।
સ્મિતદુગ્ધમુગ્ધવદનં લલનાકલિતં મહઃ કલયે ॥ ૨॥

અન્તે ચિન્તયતે યત્તત્તામેતીતિ ચ ત્વયા ગદિતમ્ ।
શિવ તવ ચરણદ્વન્દ્વધ્યાનાન્નિર્દ્વન્દ્વતા ચિત્રમ્ ॥ ૩॥

દ્રુતમુદ્ધર હર સંહર સંહર ભવવૈરિણં ત્વતિત્વરયા।
ભવ ભવતોઽપિ ભવોઽયં રિપુરેતન્નિન્દિતં જગતિ ॥ ૪॥

ચેતસિ ચિન્તય વામાં વા માં વા ન દ્વિધા સ્થિતસ્યાહમ્ ।
ઇતિ યદિ વદસિ દયાબ્ધે વામાર્ધે સા તવાપ્યસ્તિ ॥ ૫॥

મિત્રકલત્રસુતાદીન્ ધ્યાયસ્યનિશં ન માં ક્ષણં જાતુ।
યદિ કુપ્યસિ મયિ દીને તુલયામિ ત્વાં કથં સહ તૈઃ ॥ ૬॥

મત્કૃતદુષ્કૃતશાન્તિર્વિષવહ્નિજલાદિયાતનયા ।
યદિ નિશ્ચયસ્તવાયં પ્રેષય ગરલાગ્નિગઙ્ગૌઘાન્ ॥ ૭॥

ભોગં વિહાય યોગં સાધય દાસ્યે તવાપિ પરભાગમ્ ।
મમ કિં ન વાવકાશસ્ત્વદ્ભૂષાભોગિનાં મધ્યે ॥ ૮॥

લલનાલોલવિલોકનજિતમિત્યવમન્યસે કથં માં ત્વમ્।
ત્વયિ જાયાર્ધશરીરે શિવ શિવ નાઽઽલોકનાનુભવઃ ॥ ૯॥

સ્મરણાદનુપદમીદૃગ્વિસ્મૃતિશીલો ન વલ્લભોઽસિ મમ।
ઉત્પાદ્યાશાં ભઙ્ક્તુર્લગ્ના વૃત્તિસ્તવૈવેયમ્ ॥ ૧૦॥

પુત્રઃ પિતૃવત્પુત્રી માતૃવદિત્થં મમાત્ર કો દોષઃ ।
અહમપિ ભોગાસક્તઃ પ્રકૃતિર્જાતા વિષાદવતી ॥ ૧૧॥

વપુરર્ધં વામાર્ધં શિરસિ શશી સોઽપિ ભૂષણં તેઽર્ધમ્ ।
મામપિ તવાર્ધભક્તં શિવ શિવ દેહે ન ધારયસિ ॥ ૧૨॥

સ્તનપં શિશું ત્વદીયં પાલય સામ્બ દ્રુતં ન પાસિ યદિ ।
જગતઃ પિતેતિ ગીતં યાતં નામેતિ જાનીહિ ॥ ૧૩॥

માતરિ હિત્વા બાલં કાર્યાકુલધીઃ પિતા બહિર્યાતિ ।
શિવ બત શક્નોષિ કથં સ્વાઙ્ગાન્મન્માતરં મોક્તુમ્ ॥ ૧૪॥

ગુણહીનતાં તનૂજે મયિ દૃષ્ટ્વા કિં પરિત્યજસ્યેવમ્ ।
ઉચિતં ગુણિનસ્ત્વેતન્નિર્ગુણરૂપસ્ય તેઽનુચિતમ્ ॥ ૧૫॥

કામક્રોધકટાભ્યાં મદજલધારાં નિરઙ્કુશે સ્રવતિ ।
મત્કૃતદુષ્કૃતકરિણિ પ્રકટા પઞ્ચાસ્યતા તેઽસ્તુ ॥ ૧૬॥

ત્વદ્ધીનં માં દીનં દૃષ્ટ્વા વિષયાતિરાગસમ્બદ્ધમ્ ।
ધાવત્યકીર્તિરેષા નાથઃ શક્તોઽપ્યુદાસીનઃ ॥ ૧૭॥

અરિભિર્જિતૈરશક્તૈર્વિજ્ઞાપ્યં સેવકૈઃ પ્રભોર્નીતિઃ ।
વિષયૈર્જિતોઽસ્મિ શમ્ભો તવ યચ્છ્લાઘ્યં તદાચરય ॥ ૧૮॥

સંરક્ષ્યતે સ્વદાસૈર્યદ્યદ્વસ્તુ પ્રભોરભીષ્ટતરમ્ ।
દાસસ્તવેષ્ટકામઃ કાન્તાં કનકં કથં ત્યજેયમહમ્ ॥ ૧૯॥

પાપી પાપં સુકૃતી સુકૃતં ભુઙ્ક્તે મમાત્ર કિં નુ ગતમ્।
ઇત્યૌદાસ્યમયુક્તં ભૃત્યાકીર્તિઃ પ્રભોરેવ ॥ ૨૦॥

વિકલેઽતિદીનચિત્તે વિષયાશામાત્રધારિણિ નિતાન્તમ્ ।
મયિ રોષતઃ કિયત્ તે વદ વદ શમ્ભો યશો ભાવિ ॥ ૨૧॥

સ્વગૃહે ભુવનત્રિતયે યોગક્ષેમે મુખાનિ ચત્વારિ ।
મત્પ્રતિવચનં હિ વિના પઞ્ચમવદનસ્ય કુત્ર ગતિઃ ॥ ૨૨॥

તવ કોઽહં ત્વં મમ કઃ પઞ્ચસ્વેવં વિચારયસ્વેતિ ।
બ્રૂષે દીનદયાબ્ધે પઞ્ચમુખત્વં ત્વયિ વ્યક્તમ્॥ ૨૩॥

યાચસ્વાન્યં ધનિનં ભવિતા તવ કો દિગમ્બરાલ્લાભઃ ।
માં મા પ્રતારયૈવં ખ્યાતઃ શ્રીકણ્ઠનામાસિ॥ ૨૪॥

વસનાશનપ્રદાતરિ મયિ જીવતિ કિં સમાકુલસ્ત્વમિતિ ।
દોહાય મોચ્યમાનો વત્સઃ કિં ન ત્વરામયતે ॥ ૨૫॥

પાતકરાશિરિતીદં ત્વયાભિધાનં શ્રુતં ન તદ્ દૃષ્ટમ્।
તદ્દર્શનકુતુકં યદિ માં દ્રષ્ટું કિં વિલમ્બસે દેવ ॥ ૨૬॥

પાતકરાશિરસિ ત્વં પશ્યામ્યત એવ નાહમિતિ વદસિ ।
પાતકરૂપાજ્ઞાને શિવ તવ સર્વજ્ઞતાભઙ્ગઃ ॥ ૨૭॥

પાપં પાપમિતીદં કરોષિ શિવ કિં મુધા બુધાન્ ભ્રાન્તાન્ ।
તત્સત્યં ચેન્ન કથં ત્વયાનુભૂતં ન દૃષ્ટં વા ॥ ૨૮॥

પાપે લોકાનુભવઃ સ એવ માનં મમાપ્યનનુભૂતે ।
ન હિ પરકીયાનુભવઃ જ્ઞાતું શક્યઃ પરેણાપિ ॥ ૨૯॥

લોકાભિન્નઃ સોઽહં વક્તું વાક્યં હ્યુપક્રમસ્તવ ચેત્।
સિદ્ધા મનોરથા મે ત્વત્તઃ કસ્યાપિ લોકસ્ય ॥ ૩૦॥

અતિવલ્ગનં મમૈતન્મૂઢત્વં યદ્યપિ પ્રભોઃ પુરતઃ ।
દીનઃ કરોમિ કિં વા મદ્વિષયે કો નિવેદયતિ ॥ ૩૧॥

લઘુરસિ કિં ત્વયિ દયયા મા મા મંસ્થાઃ શિવેતિ સહસા ત્વમ્।
ભારો ભુવોઽસ્મિ ધૃત્વા સ્વકરે તુલયાશુ માં શમ્ભો॥ ૩૨॥

સસ્યે તૃણે ચ વૃષ્ટિં તુલ્યાં દેવઃ સદૈવ વિદધાતિ ।
દેવો મહાન્ બત ત્વં ગુરુલઘુવાર્તાં કથં કુરુષે ॥ ૩૩॥

દિષ્ટોદ્દિષ્ટં દાસ્યામ્યન્યન્નેષ્ટં યદિ સ્ફુટં વાક્યમ્ ।
દત્તા કથં ત્વયાસાવજરામરતા મૃકણ્ડુજનેઃ ॥ ૩૪॥

નાદત્તં પ્રાપ્નોતીત્યેતદ્વાક્યં પ્રતારણામાત્રમ્ ।
ઉપમન્યુના કદા વા કસ્મૈ દુગ્ધોદધિર્દત્તઃ ॥ ૩૫॥

પ્રબલતરોન્માદાઢ્યં ત્વામપ્યગણય્ય ધાવમાનં ચ ।
મચ્ચેતોઽપસ્મારં નિયમય શમ્ભો પદાભ્યાં તે ॥ ૩૬॥

આશાપિશાચિકા માં ભ્રમયતિ પરિતો દશસ્વપિ દિશાસુ ।
સ્વીયે પિશાચવર્ગે સેવાયૈ કિં ન યોજયસિ ॥ ૩૭॥

યક્ષાધીનાં રક્ષાં ત્ર્યક્ષ નિધીનાં કુતો નુ વા કુરુષે।
સાક્ષાન્મનુષ્યધર્માઽપ્યહહ કથં નુ વિસ્મૃતિર્મમ તે ॥ ૩૮॥

ધનદે સખિત્વમેતત્ તવ યત્ તત્રાસ્તિ વિસ્મયઃ ક ઇવ ।

મયિ નિર્ધને તદાસ્તાં ત્રિજગતિ ચિત્રં કિયદ્ભાવિ ॥ ૩૯॥

સખિતારૂપનિધાનં વિત્તનિધાનં દ્વિધા ધનં તવ યત્ ।
નૈકકરે નૃપનીતિસ્તત્રાન્યતરન્નિધેહિ મયિ ॥ ૪૦॥

પાલય વા માં મા વા મત્તનુભૂતા તુ પઞ્ચભૂતતતિઃ ।
પોષ્યાવશ્યં ભવતા ભવિતા નો ચેન્ન ભૂતપતિઃ ॥ ૪૧॥

અતિકોમલં મનસ્તે મુનિભિર્ગીતં કુતોઽધુના કઠિનમ્ ।
મન્યે વિષાશનાર્થં કઠિનં ચેતસ્ત્વયા વિહિતમ્ ॥ ૪૨॥

માં દ્રષ્ટુમષ્ટમૂર્તે કરુણા તેઽદ્યાપિ કિં ન વોલ્લસતિ ।
ભિક્ષાપ્રસઙ્ગતો વા કિયતાં નો યાસિ સદનાનિ ॥ ૪૩॥

વિત્તાધિપઃ સખા તે ભાર્યા દેહે તવાન્નપૂર્ણાખ્યા ।
ઊરીકૃતં ન દૂરીકુરુષે ભિક્ષાટનમપીશ ॥ ૪૪॥

નાઙ્ગીકૃતો મયા ત્વં તત એવ ન દર્શનં મમ તવાસ્તિ ।
ઇતિ નોત્તરં પ્રદેયં શિવ શિવ વિશ્વેશનામાસિ ॥ ૪૫॥

યદિ દેહગેહરૂપં દદાસિ દેશાધિકારકાર્યં મમ ।
રસનાખ્યલેખપત્રે સુદૃઢાં કુરુ નામમુદ્રાં તે ॥ ૪૬॥

રસનોક્તં કુરુ સર્વં શિવ તવ નામાધિમુદ્રિતાસ્તીયમ્ ।
ગણયસિ મુદ્રાં ન હિ ચેત્ પ્રભુતોચ્છિન્ના તવૈવ સ્યાત્ ॥ ૪૭॥

અત્યાટિનં કરાલં ભિક્ષાયુક્તં કપાલશૂલકરમ્ ।
મદ્દારિદ્ર્યં ભૈરવરૂપં કુરુ ચાર્ધચન્દ્રયુતમ્ ॥ ૪૮॥

દારિદ્ર્યચણ્ડરશ્મૌ પ્રતપતિ કેદારવચ્ચ મયિ શુષ્કે ।
જલધરતાયાં સત્યાં ત્વયિ શિવ નાદ્યાપિ સમુપૈષિ ॥ ૪૯॥

દારિદ્ર્યાખ્યમનોભૂઃ ક્લીબં ચેતોઽપિ મોહયત્યનિશમ્ ।
એનં લીનં કર્તું ધન્યઃ કોઽન્યસ્ત્વદન્યોઽસ્તિ ॥ ૫૦॥

ભાલાનલાક્ષિયુક્તસ્ત્રિજગતિ નાન્યો મદન્ય ઇતિ।
ગર્વં મા વહ યાવદ્દારિદ્ર્યાગ્નિઃ કપાલે મે॥ ૫૧॥

ચેતઃ કુરુ મા કલહં તવ વૈક્લવ્યેઽપિ શમ્ભુના પ્રભુણા।
ન વદતિ યદ્યપિ ભર્તા તવોપકર્તા સ એવાસ્તિ ॥ ૫૨॥

અયિ ચિત્ત વિત્તલેશે સહજપ્રેમ્ણા કિયન્નુ લુબ્ધમસિ ।
ન તથાપિ તદ્વિયોગઃ કેવલમાસ્તે શિવેનાપિ ॥ ૫૩॥

ચેતઃ કીર વિહારં પરિહર પરિતઃ સ્વયં પ્રયત્નેન।
અત્તું કાલબિડાલો ધાવતિ શિવપઞ્જરં પ્રવિશ ॥ ૫૪॥

ચેતઃ સદાગતે ત્વં પ્રત્યાશાવાત્યયાનુગતમૂર્તિઃ।
મા વહ વિષયારણ્યે લીનો ભવ સચ્ચિદાકાશે ॥ ૫૫॥

ચેતઃ શ ृણુ મદ્વચનં મા કુરુ રચનં મનોરથાનાં ત્વમ્ ।
શરણં પ્રયાહિ શર્વં સર્વં સકૃદેવ સોઽર્પયિતા ॥ ૫૬॥

ભ્રાતઃ શ ृણુ મચ્ચેતો મા નય કાલં ત્વિતસ્તતો ભ્રમણાત્ ।
કાલક્ષેપેચ્છા ચેદવલમ્બય કાલકાલં ત્વમ્ ॥ ૫૭॥

અયિ ચેતોવિહગ ત્વં વિષયારણ્યે ભ્રમન્નસિ શ્રાન્તઃ ।
વિશ્રામકામના ચેચ્છિવકલ્પરુહે ચિરં તિષ્ઠ ॥ ૫૮॥

ચેતોમધુકર દૂરં દૂરં કમલાશયા કુતો યાસિ ।
ધ્યાનાદનુપદમેતચ્છિવપદકમલં તવાયાતિ ॥ ૫૯॥

ચેતશ્ચકોર તાપં ભૂપં સંસેવ્ય કિં વૃથા યાસિ ।
યદિ ચન્દ્રિકાભિલાષો નિકષા ભવ ચન્દ્રચૂડસ્ય ॥ ૬૦॥

ચેતઃકુરઙ્ગ ગીતે રક્તં ચેતસ્તવાસ્ત્વનવગીતે ।
ભગવદ્ગીતાગીતે નગજાકલિતે તદારચય ॥ ૬૧॥

રસને નિન્દાવ્યસને પૈશુન્યે વા ન વાગ્મિતાં યાહિ ।
ત્રિપુરારિનામમાલાં જિતકાલાં શીલયાશુ ત્વમ્ ॥ ૬૨॥

રસને રસાન્ સમસ્તાન્ રસયિત્વા તદ્વિવેચને કુશલા ।
અસિ તદ્વદાશુ પશ્યેઃ શિવનામ્નઃ કો રસોઽયમિતિ ॥ ૬૩॥

શિવનામસલ્લતાં ત્વં રસનાપલ્લવ કદાપિ ન વિહાતુમ્ ।
યદિ વાઞ્છસે તદા મા કોમલતાં સર્વથા જહિહિ ॥ ૬૪॥

હાલાહલસ્ય તાપઃ શશિના ગઙ્ગામ્બુના ન યદિ યાતિ ।
શિવ મા ગૃહાણ ભુજગાન્ મદ્રસનાપલ્લવે સ્વપિહિ ॥ ૬૫॥

લોચન કોડભૂલ્લાભઃ સર્વાનેવ દ્વિલોચનાન્ વીક્ષ્ય ।
દૃષ્ટસ્ત્રિલોચનશ્ચેત્ સફલં જન્મૈવ તે ભાવિ ॥ ૬૬॥

નાલોકતે યદિ ત્વાં મન્નેત્રં કૃષ્ણમસ્તુ મુખમસ્ય ।
સ્વાં ત્ર્યક્ષ દક્ષતાં મે દર્શય નયનાવલોકસ્ય ॥ ૬૭॥

ત્વં લોચનાન્ધકારે દ્રષ્ટું વસ્ત્વન્ધકારભિન્નં કિમ્ ।
વાચ્છસ્યનેન સઙ્ગેઽદૃશ્યમપીદં ત્વયા દૃશ્યમ્ ॥ ૬૮॥

શ્રવણ સખે શૃણુ મે ત્વં યદ્યપિ જાતો બહુશ્રુતોઽસ્તિ ભવાન્ ।
શબ્દાતીતં શ્રોતું શિવમન્ત્રાત્ કોઽપરો મન્ત્રઃ ॥ ૬૯॥

ઘ્રાણ પ્રાણસખો મે ભવસિ ભવાન્ પાર્થિવોઽસ્તિ કિમુ વાન્યત્ ।
શિવપદકમલામોદે મોદં ગન્તાસિ યદિ શીઘ્રમ્ ॥ ૭૦॥

રામાસ્પર્શસુખે તે નિતરાં ભો વિગ્રહાગ્રહોઽસ્તિ યદિ ।
આલિઙ્ગયાર્ધરામં રામાઽભિન્નઃ સ્વયં ભવસિ ॥ ૭૧॥

વિગ્રહ વિગ્રહમેવ ત્વં કુરુ દેવેન નાઽમુના સખ્યમ્ ।
રુચિરપ્યસ્મિન્ શમ્ભૌ જનયત્યરુચિં સ્વદેહેઽપિ ॥ ૭૨॥

સમ્મીલયાશુ રામાં ત્વદ્વામાઙ્ગાન્મયા સમં શમ્ભો ।
જાતં મમાપિ યસ્માદ્ દુઃખેનાર્ધં શરીરમિદમ્ ॥ ૭૩॥

અપરાધકારિણં માં મત્વા શમ્ભો યદિ ત્યજસ્યેવમ્ ।
વ્યાધઃ શિરસિ પદં તે દત્વા ન જગામ કિં મુક્તિમ્ ॥ ૭૪॥

પાર્થઃ કલહં ધનુષા તાડનમપિ મૂર્ધ્નિ તે ન કિં કૃતવાન્ ।
તત્રાપિ તે પ્રસન્નં ચેતઃ સન્ને મયિ કુતો ન ॥ ૭૫॥

ત્વયિ તુષ્ટે રુષ્ટે વા શિવ કા ચિન્તા સ્વદુઃખભઙ્ગે મે ।
ઉષ્ણં વાનુષ્ણં વા શમયતિ સલિલં સદૈવાગ્નિમ્ ॥ ૭૬॥

દોષાકરે દ્વિજિહ્વે રતિમતિશયિતાં કરોષિ યદિ શમ્ભો।
અહમસ્મિ તથા વિતથા કુરુષે માં દૃક્પથાતીતમ્ ॥ ૭૭॥

ચેતો મદીયમેતત્સેવાચૌર્યે યદિ પ્રસક્તં તે ।
દણ્ડય નિતરાં શમ્ભો સર્વસ્વં લુણ્ઠયૈતસ્ય ॥ ૭૮॥

સદનં પ્રત્યાગમનં કુશલપ્રશ્નોક્તિરસ્તુ દૂરતરે ।
આલોકનેઽપિ શમ્ભો યદિ સન્દેહઃ કથં જીવે ॥ ૭૯॥

આવાહિતઃ સ્વભક્તૈસ્ત્વરયૈવાયાસિ સર્વપાષાણે ।

ચિત્તોપલે મદીયે હે શિવ વસ્તું કુતોઽસ્યલસઃ ॥ ૮૦॥

વૃષભે પશૌ દયા તે કિયતી શમ્ભો પશુપ્રિયોઽસિ યદિ ।
વિષયવિષાશનતોઽહં પશુરેવાસ્મીતિ માં પાહિ ॥ ૮૧॥

ત્વયિ દૃષ્ટ્વૌદાસીન્યં તત્સ્પર્ધાતો વિવર્ધતે દૈન્યમ્ ।
મયિ તજ્જેતું ત્વરયા પ્રેષય નિકટેઽસ્તિ યત્ સૈન્યમ્ ॥ ૮૨॥

પરિપાલયામ્યહં ત્વાં નિકટેન મયા કિમસ્તિ તે કાર્યમ્ ।
મૈવં દૂરે રમણે સુભૃતાઽપિ ન મોદતે સાધ્વી ॥ ૮૩॥

કતિકતિવારં જનનં તવ નો જાતં ન મત્સ્મૃતિઃ ક્વાપિ ।
ઇતિ કુપિતોઽસિ યદિ ત્વત્પદયોર્નિદધામિ મૂર્ધાનમ્ ॥ ૮૪॥

શિવ શઙ્કર સ્મરારે કિઞ્ચિત્પ્રષ્ટવ્યમસ્તિ તત્કથય ।
વઞ્ચનમેવ કરિષ્યસિ કિં વા કાલાન્તરે પ્રીતિમ્ ॥ ૮૫॥

યો યન્ન વેત્તિ દુઃખં કર્મ સ તસ્મિન્નિયોજયતુ શમ્ભો ।
ભિક્ષાદુઃખં જાનંસ્તત્ર કથં માં નિયોજયસિ ॥ ૮૬ ॥

કાકૂક્તિર્મુખદૈન્યં શિવ મે બાષ્પસ્તથાશ્રુસમ્પાતઃ ।
ત્વય્યેકસ્મિન્ પુરુષે સર્વમિદં નિષ્ફલં ભવતિ ॥ ૮૭॥

શિવ દેહિ મે સ્વભક્તિં તૃષ્ણા સ્વયમેવ યાસ્યતિ તતો મે ।
પતિમન્યત્ર વિષક્તં દૃષ્ટ્વા કાન્તા ન કિં ત્યજતિ ॥ ૮૮॥

ગુણહીનોઽપિ શિવાહં ત્વત્કરમુક્તોઽપિ તત્ પદં યાસ્યે ।
ભ્રષ્ટોઽપિ ભૂપહસ્તાદ્ગુણતોઽપિ શરો યથા લક્ષ્યમ્ ॥ ૮૯॥

ભક્તજનેષ્વનુરક્તં ધરણીધરકન્યયા પરિષ્વક્તમ્ ।
પ્રખ્યાતનામધેયં જયતિતરાં ભાગધેયં મે ॥ ૯૦॥

ફણિકુણ્ડલં વહન્તી શ્રવણે તાટઙ્કમપ્યપરભાગે ।
સિતશોણકાન્તિયુક્તા કાચિન્મદ્ધાસના જયતિ ॥ ૯૧॥

આલિઙ્ગિતોઽપિ સવ્યે શમ્પાતત્યા શિવઃ પ્રકૃતિતોઽયમ્ ।
કરુણામ્બુપૂર્ણગર્ભઃ કશ્ચિદ્ધારાધરો જયતિ ॥ ૯૨॥

જટિલં શિરઃપ્રદેશે નિટિલે કુટિલં ગલે તથા નીલમ્ ।
હૃદયીકૃતાદ્રિબાલં વિલસતિ કાલં જયત્ તેજઃ ॥ ૯૩॥

ધનુરેકત્ર પિનાકં સશરં બિભ્રત્ તથાઽપરત્રાઽપિ ।
શરમૈક્ષવં ચ ચાપં કિઞ્ચિત્ તત્ પ્રેમ મે જયતિ ॥ ૯૪॥

વાઞ્છિતવિતરણશીલં વિચિત્રલીલં નિરાલવાલં ચ ।
લલનાલતૈકતાનં કલયે શિવકલ્પભૂમિરુહમ્ ॥ ૯૫॥

પરિહૃતદુર્જન તિમિરં નગજાનન્દૈકસિન્ધુવૃદ્ધિકરમ્ ।
નન્દિતભક્તચકોરં વન્દે ચન્દ્રોદયં કઞ્ચિત્ ॥ ૯૬॥

નિખિલનિગમૈગદુગ્ધાં દાનવિદગ્ધાં શુકાદિમુનિદુગ્ધામ્ ।
વપુષા સદૈવ મુગ્ધાં કલયે શિવકામધેનુમહમ્ ॥ ૯૭॥

નિત્યપ્રભાભિરામં વિદલિતકામં સદાર્ધધૃતભામમ્ ।
હૃદિ કોમલં નિકામં શ્રીશિવચિન્તામણિં વન્દે ॥ ૯૮॥

નિર્વ્યાધિ મે શરીરં નિરાધિ ચેતઃ સદા સમાધિપરમ્ ।
કુરુ શર્વ સર્વદા ત્વં નાન્યં કામં વૃણે કઞ્ચિત્ ॥ ૯૯॥

આર્યાપતેઃ પદાબ્જે નિહિતં શતપદ્યપત્રમયપુષ્પમ્ ।
આર્યાશતં સુકૃતિનાં હૃદયામોદં સદા વહતુ ॥ ૧૦૦॥

॥ ઇતિ ભરદ્વાજકુલતિલકશ્રીમદપ્પય્યદીક્ષિત-
વિરચિતશૈવાર્યાશતકં સમ્પૂર્ણમ્ ॥

Proofread by Sunder Hattangadi

---

*AryAshatakam by Shri Appayya Dikshit*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*